International Journal of Jyotish Research: 2022; 7(2): 33-37

International Journal of Jyotish Research (वेदचक्षु)

**ISSN:** 2456-4427
**Impact Factor:** RJIF: 5.11
Jyotish 2022; 7(2): 33-37
© 2022 Jyotish
www.jyotishajournal.com
Received: 23-05-2022
Accepted: 26-06-2022

**Ishwar Bhat**
Professor, Former Controller of Examination, CSU
Head, Department of Jyotish, Central Sanskrit University, Jaipur Campus, Triveni Nagar, Jaipur, Rajasthan, India

**Correspondence**
**Ishwar Bhat**
Professor, Former Controller of Examination, CSU
Head, Department of Jyotish, Central Sanskrit University, Jaipur Campus, Triveni Nagar, Jaipur, Rajasthan, India

# ज्यौतिश्शास्त्रे प्रारब्धकर्मविचारः

**Ishwar Bhat**

## प्रस्तावना

सर्वेषाम् आस्तिकमहाजनानां सर्वेषु वैदिककर्मसु कालं विपणय्य प्रवृत्ति इत्यैतत् दरीदृश्यते। विभुरपि कालः ग्रहनक्षत्रादीनि ज्योतीषि उपाधिकृत्य वितेष्यते। अतः ज्यौतिषं वेदाङ्गमस्ति। वेदाङ्गभूतेऽस्मिन् ज्योतिः शास्त्रै प्रारब्धकर्मविचार इति विषयमाधारीकृत्य शोधप्रबन्धः प्रस्तूयते।

श्रुतिस्मृत्यादिषु प्राणिमात्रस्य जन्मायुर्मोगः कर्माधीनमिति प्रोचुः। ज्यौतिषे ग्रहाधीनं कर्मणः फलमित्यवोचन्। पूर्वोक्तविषयद्वयमपि प्रामाणिकमेव। इदानीं प्रश्नो उदेति यदि ग्रहाधीनं कर्म वर्तते चेत् कर्मणः तावत् कुत्र उपयोगिता? यदि कर्माधीनं ग्रहाः स्युः तर्हि ग्रहाणां का उपयोगिता वर्तते इति। एवं रीत्या अन्येषां प्रश्नानामुपर्यपि अस्मिन् शोधप्रबन्धे शास्त्रोक्तरीत्या मीमांसा क्रियते।।

आद्यप्रथमतया वयं कर्मणः स्वरूपं विचारयामः। कर्मो नाम क्रिया। क्रियाया व्यापारः सनातनः वर्तते एव। जडचेतनशब्देन प्रसिद्धेषु सर्वेषु पदार्थेषु व्यापारः विलोक्यते। आकाशादिभूतेषु यः व्यापारः विद्यते तद् व्यापारः आधिभौतिकः, ग्रहनक्षत्रेषु यः व्यापार, वर्तते तद् आधिदैविकः किञ्च प्राणिनां शरीरादिषु यद् व्यापारः वर्तते तद् आध्यात्मिकं कर्मेति कथ्यते। त्रिविधसंसारव्यापारस्य प्रयोजनमपि पुरुषस्य कृते भोगापवर्गस्य प्राप्तये अस्ति। तत्र आध्यात्मिकव्यापारे कायिक-वाचिक-मानसिकञ्चेति त्रेधा विभागः क्रियते। अत्र शरीरस्य सकाशाद् यत् कर्म क्रियते तद् कायिकः, वाण्या यत्कर्म क्रियते तद् वाचिकः, मनसः सकाशाद् यत्कर्म क्रियते तन्मानसञ्चेति। इन्द्रियाणां कर्माण्यपि मानसिकव्यापारे एव अन्तर्भूताः भवन्ति। पूर्वोक्तानि इमानि सर्वाणि कर्माणि केवलं प्राणिषु एव प्रायः विलोकिताः भवन्ति। यत्किमपि कर्म निष्फलं नैव भवति। कदाचित् कर्म जडगतं वा भवतु, चेतनगतं वा भवतु किञ्च यथा कर्म निष्फलं नैव भवति तथैव निर्हेतुकमपि नैव भवति। तत्तद् कर्मणां फलं यत्किमपि अवश्यमेवास्ति। कस्य कस्य कर्मणः किं किं फलं, तत्र को हेतुः एतेषां सर्वेषां विषयाणां सुस्पषृतया निर्णयः स्मृतिग्रन्थेषु शुभाशुभरूपेण भागद्वये विभक्तमस्ति। सुखस्य जनकत्वात् तानि शुभकर्माणि। दुःखस्य जनकत्वात् तानि अशुभकर्माणि। अतः सुखदुःखयोः हेतुरस्ति कर्म। कर्म किञ्च तत्फलव्यापारयोः सांकर्य न स्यात्। अतो येन प्राणिना कृतं शुभाशुभं कर्म वर्तते तत्कर्मणः फलमपि तत्प्राणिनः कृते एव मिलति। अनुकूलवेदनीयत्वं सुखम्। प्रतिकूलवेदनीयत्वं दुःखम्। सुखदुःखयोरपि आधिदैविकादिरूपेण भेदत्रयमस्ति। देवैः, पञ्चभूतादिभिः, शरीरादिना अनुभूयमानं सुखदुःरवे पूर्वोक्तं प्रकारत्रयेण भवति । सुखदुःखफलात्मककर्मण नाशः सञ्जायते। अत: अस्य नाशकहेतौ मुमुक्षोः जिज्ञासा भवति। अतएव सांख्याकारिकायाम् उच्यते।

**तद्यथा**

"दुःखत्रयाभिघाताज्जिज्ञासा तदभिघातके हेतौ।
दृष्टे साऽपार्था चन्नैकान्तात्यन्ततोऽभावात्"।। इति॥[1]
"क्लेशमूलः कर्माशयो दृष्टादृष्टजन्मवेदनीयः"।[2]

(व्यासभाष्ये) अर्थात् पुण्यापुण्यात्मककर्मसंस्कार एवं क्लेशस्य मूलमस्ति। एतदेव काम-क्रोध-लोभ-मोह-भयेर्ष्या-विषादादीनां जनकः। अत एते अस्मिन् जन्मनि जन्मान्तरे वा वेदनीयमस्तीति भावः।

**उक्तञ्च**

"तद य इह रमणीयचरणा अभ्याशो ह यत्ते रमणीया योनिमापद्येरन् ब्राह्मणयोनिं वा क्षत्रिययोनिं वा। अथ य इह कपूय चरणा अय्याशो ह यत्ते कपूयां योनिमापद्येरन् श्वयोनिं वा चाण्डालयोनिं वा।" ।।इत्यादिश्रुतिः।।"[3]

ये कुर्वन्ति शुभकर्माणि ते ब्राह्मणादि शुभयोनिषु जन्म प्राप्नुवन्ति। यैः पापकर्माणि क्रियन्तै तैः कपूयां योनिम् अर्थात् सूकरादि पापयोनौ जन्म प्राप्यते। स्मृतिरपि कथयति।
तद्यथा -

“योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः ।
स्थाणुमन्ये तु संचन्ति यथा कर्म यथाश्रुतम्"।।इति॥[4]

स्वकर्मानुसारेण केचन प्राणिनः ब्राह्मणादि योनिषु केचन वृक्षलतास्थाण्वादिभावं भजन्ते। एभिः उदाहरणै सुस्पृषो भवति प्राणिनां कर्मानुसारं गतिः जन्म, आयुः, भोगश्च सम्भवति।
उक्तञ्च -

पूर्वकर्मफलं भोक्तुं जन्तोर्यदिह जीवनम्।
आयुस्तकर्म शक्त्या स्वाद्धीर्घमध्याल्पताधिकम् ।। इति।।[5]

**अपि च**

"सति मूले तद्विपाको जात्यायुर्भोगाः"'[6] इति योगसूत्रानुसारेण कर्मणः मूले अविद्यायाः स्थितिवशात् जन्म-आयु-सुख दुःख-भोगाश्च कर्मणः विपाकाः वर्तन्ते। अतः कर्म एव जीवनचक्रस्य प्रवर्तको अस्ति। ।
कर्माणि त्रिविधानि सन्ति। सञ्चित-प्रारब्ध-क्रियमाणश्चेति। अतीतशरीरादिना प्राणिना अर्जितं कर्म सञ्चितम्। सञ्चितकर्म तावत् संस्काररुपेण जन्तूनाम् आत्मनि अथवा अन्तःकरणे फलस्य भोगपर्यन्तं विद्यमानो भवति। इदं च कर्म ब्रह्मविद्यातः भस्मीभूतो भवति। भोगं विना एतत् कर्मणः सकाशात् निवृत्तिः नास्ति। अस्य सञ्चितकर्मणां सकाशादेव फलोन्मुखकर्मराशिः शरीरस्य आरम्भको भवति। यत्कृते अस्माभिः प्रारब्धकर्मेति कथ्यते। येषां कर्मणां फलं जन्तुः वर्तमानशरीरेण भोक्ष्यति। एभिः कर्मभिः प्राप्तशरीरेण कायिक-वाचिक-मानसिकादिकर्मणां निष्पत्तिः भवति। तत्क्रियमाण कर्मेति व्यवहरिष्यते। क्रियमाणकर्म एव कालान्तरे सञ्चितकर्मत्वेन परिणतो भवति। एवं रीत्या कर्मणां समाप्तिरेव न भवति। सञ्चितकर्मणः सकाशाद् प्रारब्धकर्म, प्रारब्धकर्मणः सकाशाद् क्रियमाणं कर्म, क्रियमाणकर्मणः सकाशाद् पुनः सञ्चितं कर्मञ्चेति एवं प्रकारेण घटीयन्त्रवत् पौनः पुन्येन कर्मणः चक्रं प्रचलिष्यमाणो वर्तते। प्राणिनः एतस्मात् कर्मचक्रात् मुक्ताः भवितुं नर्हन्ति। इदमेव कर्मचक्रं भवबन्धन-संसारादिशब्देन व्यवहरिष्यते। इत्थं कर्म एव कर्मणः जनको वर्तते। सर्वेषां कर्मणां मूलमस्ति अविद्या। अविद्या नाम आत्मविषयक अज्ञानम्। कर्म एव बन्धनस्य कारणं वर्तते। (सुख-दःख-काम-क्रोध-मोहादयः) ब्रह्मविद्या एव भवबन्धनात् मोक्षस्य कते कारणम् अस्ति। (मोक्षो नाम आत्मनः स्वरूपावस्थितिः) यावत् पर्यन्तं भवबन्धनस्य नाशो न भवति तावत् पर्यन्तं जीवस्य मुक्तिः न भवति।
आत्मविषयकविद्यया सञ्चितकर्माणि भस्मीभूतानि भवन्ति। प्रारब्धकर्माणि भोगादेव विनष्टानि भवन्ति । परन्तु क्रियमाणकर्माणि ज्ञानाग्निना भर्जितबीजवत् शरीरान्तस्य आरम्भकाः नैव भवन्ति। इत्थं जीवस्य मुक्तिर्भवति ब्रह्मविद्यया। श्रुतौ उच्यतै।
तद्यथा -

"भिद्यते हृदयग्रन्थिः छिद्यन्ते सर्वसंशयाः।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे"॥इति॥[7]
अत्र स्मृतिरपि प्रमाणमस्ति।

**तद्यथा -**

"ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुतेऽर्जुन"।इति।[8]

अर्थात् परब्रह्मणः साक्षात्कारेण जीवस्य हृदय ग्रन्थिः (आत्मानात्मनो अध्यासः) नाम अनात्मशरीरादौ आत्मभावः विनश्यति। तेन सर्वे संशयाः छिद्यन्ते। सर्वाणि कर्माणि क्षीयन्ते। ज्ञानरूप्यग्निना सर्वाणि कर्माणि विनष्टानि भवन्ति। इत्थं कर्मणा बध्यते जन्तुः विद्यया च विमुच्यते। भवबन्धनस्य हेतुः कर्म, मोक्षस्य हेतुः तावत् विद्या।

इदानीम् उपक्रमेऽस्मिन् ज्योतिश्शास्त्रानुसारेण प्रारब्धकर्मणः स्वरूपं विचारयामः।

जगतः शुभशुभफलनिरूपणे प्रवृत्तमिदं ज्यौतिश्शास्त्रं मया पूर्वप्रतिपादितवत् वेदाङ्गेषु नेत्रमस्ति। सिद्धान्तहोरासंहिताभेदेन त्रिधावस्थिते अस्मिन् ज्यौतिश्शास्त्रे यत्र महीयसा गणितबन्धेन खेटगतयो विचार्यन्ते स सिद्धान्तः। प्राणिनां जन्मकालवशेन ग्रहजनितशुभाशुभनिरूपकं शास्त्रं जातकम् अथवा होराशास्त्रम्। एवं च तत्तद्कालिकग्रहचारवशेन सुभिक्षदुर्भिक्षादिसार्वभौमफलप्रतिपादकं शास्त्रं संहिता। तत्र अहोरात्रशब्दस्य आद्यान्तिमवर्णयोःलोपात् होराशब्दस्य व्युत्पत्तिः लाघवेन सिध्यति। जातकशास्त्रस्यैव अपरं नाम होराशास्त्रम्। अस्मिन् होराशास्त्रे प्राणिनां जन्म-आयु-कर्मादीनाञ्च विचारः विधीयते।

अस्मिन् शास्त्रे जन्मकुण्डल्याः द्वादशभावेषु ग्रहाणां स्थित्यनुसारेण जातकस्य भविष्यत्फलविचारो विधीयते। कण्डल्यां द्वादशभावेषु विद्यमानानां ग्रहाणाम् उच्च-नीच-अस्त-बाल-कुमार-युवा-वृद्ध-सुप्ताद्यवस्थानुसारेण, ग्रहाणां तत्तद्योगवशाच्च मानवस्य कर्मादीनां विचारः क्रियते।

अत्र कैश्चित् उच्यते यत् ग्रहाणां स्थितेरनुसारेण प्राणिनां जीवने सुकृतं दुष्कृतं चेति द्विविधकर्मवशात् सुखदुःखयोः प्राप्तिर्भवति। अन्ते च मारकग्रहस्य प्रभावेण मरणं भविष्यतीति। एतन्नयुक्तम्-यतः जातकशास्त्रे पञ्चसिद्धान्तकोविदै उहापोहपटुभिः सिद्धमन्त्रैश्च दैवज्ञैः जन्मकुण्डल्यां ग्रहस्थितिमवलोक्य जातकस्य प्राक् जन्म-इहजन्म-अग्रिमजन्मनः विषयेऽपि वक्ष्यन्ते। सद्योजातस्य भविष्यत्काले आयुर्विद्या धनमित्रधर्मकर्मादीनि च स्पष्टतया भाषयितुं शक्यन्ते। विविधराजयोग-महापुरुषयोग-सुनका-अनफा-केमद्रुमाद्योगवशाच्च भविष्यत्फलस्य रहस्यं ज्योतिर्विदः समुद्घाटयन्ति। किञ्च जातकस्य आयुर्दाय-रोग-दुःख-दारिद्रय-जन्मान्तरगति-मृत्यु-तद्धेशकालप्रभृतयः सर्वे विषयाः ग्रहस्थित्या विज्ञातुं शक्यन्ते। अपिच विद्या-वित्त-सुत-मित्र-कलत्र-भूमि-भवन-यात्रादीनाञ्च विचारः सम्यक् क्रियते। अतः एकैव शब्देन वक्तव्यं भवति यत् जातकस्य भूत भविष्यद्वर्तमानश्चेति त्रिकालेष्वपि जन्म-आयु-भोगादयश्च ज्यौतिषद्वारा एव निरूप्यन्ते।

ननु जातकस्य शुभाशुभकर्मफलं किं ग्रहाणां तत्तत्स्थानावस्थितिवशाद् चिन्तनीयम् उत ग्रहा एवं पुरुषं सुखदुःखप्रदाने तदनुकूलकर्मव्यापारेण नियोजयन्ति? यद्वा कर्म स्वोपार्जितमस्ति, चेदुच्यते। कर्मानुसारं ग्रहस्थितिः किञ्च ग्रहस्थितिवशात् कर्म वर्तते इत्युच्येत, तर्हि अन्योन्याश्रयदोषः सम्पद्यते। यदि अनादिकालप्रवाहेन पतितत्वात् बीजाङ्कुरन्यायवत् अन्योन्याश्रयदोषं नाङ्गीकुर्मः तदानीमपि एकः प्रश्नः उदेति। किं सुदूरवर्तिनभः प्राङ्गणे मन्दशीघ्रगत्या प्रचलिष्यमाणाः जडग्रहाः नक्षत्राणि च जातकस्य जन्मादितः सम्बन्धं स्थापयिष्यन्ति वा इति। यद्वा स्वभावतः स्वकक्षायां गम्यमानाः ग्रहाः मानुषजीवने तावत् कथं प्रभावं कुर्वन्तीति कैश्चिद् अयमाक्षेपः।

अस्य आक्षेपस्य इदं समाधानम्- पृथिव्यपतेजोवायुराकाशादिपञ्चमहाभूतानि यथा शरीरादिकस्य हेतवः भवन्ति तथैव ग्रहा अपि शरीरादिकस्य हेतवः सन्ति। यतो हि कस्यापि कार्यस्य पञ्चकारणानि भवन्ति।

उक्तञ्च भगवद्गीतायाम् -

"अधिष्ठानं तथा कर्ता कारणं च पृथग् विधम्।
त्रिविधा च पृथक् चेष्टा दैवं चैवात्र पञ्चमम्"॥ इति॥[१]

अत्र शरीरादीनाम् अधिष्ठानं पञ्चभूतानि, कर्ता ईश्वरः, विविधचेष्टाकरणव्यापारः करणं, दैवं (प्रारब्धं) पूर्वजन्मार्जिकर्महेतवः, सहकारीकारणानि ग्रहनक्षत्रादीनां स्थितियोगेषु अन्तर्भूताः भवितुमर्हन्ति। तदपि युक्तिसंगतं न प्रतीयते। यतः कार्यकारणयोः सम्बन्ध एवं नोपपद्यते। ग्रहैः सकाशाद् उत्पत्स्यमानं, उत्पद्यमानं वा सम्बन्धम् उत्पत्स्यमान शरीरेण कल्पयितुं न शक्यते। कथञ्चित् परम्प्रया सम्बन्धं विभावयामश्चेत् तदानीमपि ग्रहनक्षत्राणि जन्मनः कारणत्वेन स्वीकारे अन्यथासिद्धदोषः सम्भवति। अतः देशकाल-ईश्वर-अदृष्टादिवत् ग्रहनक्षत्राण्यपि समान्यकारणानि भवन्ति। न तु तत्तद् फलानां कृते विशिष्टकारणानि। अतः ज्योतिःशास्त्रे ग्रहादीनां फलप्रतिपादनम् असंगतमेव पतीयते।

एतन्नयुक्तम्। यतः पूर्वोक्त-पञ्चविधकारणकल्पे देश-काल-ईश्वर-अदृष्टादिसाधारणकारणेषु ग्रहादीनामपि गणना कर्तव्या भवति। तानि सर्वाणि ग्रहनक्षत्राणि पञ्चमहाभूतादयः, स्वकृतकर्म-देश-काल-ईश्वर-अदृष्टादयश्च कार्यस्य हेतवः सन्ति। तेषु कानिचित् साधारणकारणानि कानिचिच्च असाधारणकारणानि सन्ति। यथा सूर्यचन्द्रौ जातकस्य जन्मादौ स्पष्टहेतुत्वं प्रकटयतः, तथैव कुजादयो ग्रहाणामपि स्वरश्मि-स्वोदय-स्वदृष्टि-स्वास्तमन-स्वोच्च-स्वनीचत्व-बालत्व-युवत्व प्रभृतीन् प्रभावान् जन्मादित एव स्पष्टतया जनयन्ति। ग्रहाणां स्वरश्मिवशात् सूर्यचन्द्रवत् जातकेन सह सम्बन्धोऽपि उपपन्नो भवति। अतः ग्रहनक्षत्रादीनां प्रभावः जातकस्योपरि अनिवार्यत्वेन अपरिहार्यत्वेन च भावयेदेव।

कस्य ग्रहस्य कीदृशी अवस्थायां कस्मिन् भावे कथं प्रभावः विद्यमानो अस्तीत्यस्य विषयस्य विस्तृतं सुस्पष्टं च विवेचनं जातकशास्त्र करिष्यति। मानवजीवनस्य प्रभावकचेतनत्वेन

मातृ-पित्र-गुरु-भ्रातृ-स्त्री प्रभृतयोऽपि यथा स्युः तथैव ते जडग्रहाः। यथा सूर्यचन्द्रयोः प्रभावे आगत्य मानवः आतपशैत्याद्यनुकूलकर्म करिष्यति तथैव प्रकारेण ग्रहान्तरस्य प्रभावादपि कर्मणि प्रेरणां विभाव्य एव खलु। अतः ज्योति पिण्डानां प्रभावस्य निषेधम् अज्ञानिनः पुरुषा एव करिष्यन्ति, न तु ज्ञानिनः।

पुनः शङ्का क्रियते। पूर्वोक्त कथनानुसारेण इत्थं वक्तव्यं भवति "ग्रहाधीनं जगत् सर्वम्" इति। सर्वेषां प्राणिनां जन्म-आयु-भोग-मृति-जन्मान्तरकर्म प्रभृतयः केवलं ग्रहैः सकाशादेव सञ्चालिताः भवन्ति। शुभाशुभफलदातारे ग्रहा एव स्युः। सुकृत-दुष्कृतयोरपि हेतवः ग्रहा एव। आढ्यता-दारिद्र्यता-निरोगिता-विद्यावता-मूर्खतादीनां च सर्वासां भावानां कृते हेतुरस्ति ग्रहैव। व्यर्थमेवास्ति सञ्चित-क्रियमाण-प्रारब्धकर्मराशीनां हेतुत्वेन स्वीकारो इति। अस्याक्षेपस्य इदं समाधानम्। नैवम्। यतो हि गुणस्वरूपस्वभावगत्यादिना नियतं ग्रहनक्षत्रादीनि जीवने फलकर्मणोः वैविध्यतायाः हेतवः कदापि न भवन्ति। ग्रहातिरिक्तं हेतुवैषम्य-फलवैषम्पयोः भेदेन कारणं कथञ्चिद् बलात् अङ्गीकार्यमेव । तत्कारणं प्रारब्धादिकर्म । अन्यथा कर्मणां नैष्फल्यत्वमेव सिध्येत । यदि कर्मणां नैष्फल्यत्वं सिध्येत तर्हि वेदादिशास्त्रेषु प्रतिपादितविधिनिषेधात्मकसमस्तकर्मणां व्यर्थत्वापत्तिः सम्भवति। कर्मप्रतिपादकशास्त्राणि अप्रामाणिकानि स्युः। किञ्च तत्तद्ग्रहाणां विविधफलहेतुतायाः हेतुत्वमपि अपेक्षितमस्ति। अन्यथा एकैव स्वभावेन नियतो ग्रहः केषाञ्चिद्जनानां कृते एवं शुभद अन्येषां कृते अशुभदः कथं वा स्यात्। यद्येवम् उच्यते यत् जन्मकाले एव तत्तद्भावस्थितिवशात्, ग्रहान्तरदृष्टिवशात्, स्वोच्चाद्यवस्थावशात् ते च विविधफलनां हेतवः स्युश्चेत्तदपि न। कथं केषाञ्चिद्जनानां जन्मकाले ग्रहाणाम् आनुकूल्यं प्रातिकूल्यं वा भवति। अतः कोऽपि नियामकः तेषां कृतेऽपि स्यादेव। अचेतनग्रहेषु स्वेच्छाप्रवृत्तिं कदापि वक्तुं न शक्यते। अतः तस्यापि कारणं प्राणिनां स्वोपार्जित-कर्म एव । तस्मात् साक्षाद् वक्तुं शक्यते यत् जीवने आनुकूलता प्रतिकूलतायाश्च वास्तविकं हेतुः स्वकृतकर्मैव। यतः जन्मायुर्भोगादीनि कर्माधीन एव। इदं च तथ्यं शास्त्रसम्मतं युक्तिसम्मतं च प्रतिभाति। अस्याः निराकरणं कर्तुं न शक्यते। स्वकृतकर्मणः कारणादेव ग्रहाः अनुकूल-प्रतिकूल-फलयोः दातारो भवेयुः। स्वकृतकर्मानुसारेण फलप्रदाने सहकारीकारणत्वेन ग्रहेषु उच्चत्व-नीचत्व-बालत्व-वृद्धत्वादीनां च कल्पना वर्तते। अन्यथा आकाशस्थैः ग्रहैः नियतगत्या स्वकक्षायां परिभ्रमणं कुवद्भिः तैः सकाशात् भूमिस्थानां जन्तूनां सम्बन्धाभावात् कथं तेषाम् उच्चत्वं, नीचत्वं बालत्वं वा भवेत्।

अतः निष्कर्षेण इदं स्वीकर्तव्यं यत् स्वकृतकर्मफलस्य निष्पादकतया ग्रहादीकानां उपयोगः वर्तते। सुकृतं दुष्कृतंश्चेति यानि प्रारब्धादीनि कर्माणि तेषां फलं यानि सुखदुःखादीनि तन्निष्पादनाय चेतनरूप्यात्मनि आत्मेतरजडवर्गस्य कल्पनां विना कथं कर्तुं शक्यते। अतः कर्मफलस्य निष्पादने शरीराद्यतिरिक्तं भूतमात्रं कल्पनीयमेव । भोगायतनमस्ति शरीरादयः। जन्मकुण्डल्याः सकाशाद् स्वकृतकर्मानुसारेण शुभाशुभात्मकं फलम् अनुमीयते। अमुमेव अभिप्राय वराहः स्वीयलघुजातकाख्ये ग्रन्थे ब्रूते।

उक्तश्च -

> "यदुपचितमन्यजन्मनि शुभाऽशुभं तस्य कर्मण: पंक्तिम्।
> व्यञ्जयति शास्त्रमेतत् तमसि द्रव्याणि दीप इव"।। इति॥[10]

अत्र पुनः शङ्कयते-ननु ग्रहयोग एव शुभाशुभ फलसूचकमात्रमस्ति उत नैवेति चेत्, उच्यते नैवम् ग्रहयोगः शुभाशुभफलमात्रसूचको नास्ति यथा शाकुनानि शुभाशुभफलसूचकानि। यद्यपि ग्रहस्थितिं विलोक्य भविष्यत्फलस्य स्थितिं ज्ञातुं शक्यते। एवं सत्यपि ग्रहयोगानाम् उपयोगिता न केवलं शुभाशुभसूचनायाः प्रदाने हेतुः। किन्तु फलनिष्पादकतयाऽपि अस्योपयोगः वर्तते एव। ते योगाः स्वयम् अन्नपानादिवत् सुखदुःखात्मकफलप्रतिपादने सहकारिणः भवन्ति। परन्तु दृष्टानि शाकुनानि फलसूचकमात्राण्येव कल्पनीयानि।। तानि शाकुनानि सुखदुःखयोः हेतुभूतानि न भवन्ति।

पुनः शङ्का क्रियते-कर्मणः मूलं किम्? किमर्थं कश्चित् शुभकर्म करोति। कश्चिच्च अशुभं कर्म करिष्यति, इति।

अस्याः शङ्कायाः समाधानं इदमस्ति-कर्मणः मूलस्यापि हेतुः पूर्वजन्मार्जितकर्म एव। पूर्वपूर्वकर्मजन्मयसंस्कारः उत्तरोत्तरफलभोगस्य हेतुरस्ति, किञ्च कर्मण अपि हेतुः। अतः कर्म तत्कर्मणः फलस्य भोगयोर्मध्ये अनादिकालादेव बीजवृक्षवत् हेतुः फलभावश्च व्यवस्थितो अस्ति। पुनः शङ्का क्रियते। कर्म तावत् किम् आत्मनः धर्मः अनात्मनः धर्मो वा इति। कर्म तावत् अनात्मनः धर्मः। अनात्म जडः वर्तते। कर्मोऽपि जडनिष्ट एव। आत्मा तावत् निष्क्रियः, निर्गुणः, निर्विकारो वर्तते। अनात्मनः प्रकृतिगत कर्मणाम् आरोपः आत्मनि एव भवति। अतः आत्मा स्वयं कर्ता भोक्तेति मनुते। प्रकृतिगतकर्मणाम् आरोपः आत्मनि अविद्यायाः कारणेन भवति। तदेव उच्यते भगवद्गीतायाम् –

> "प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः।
> अहङ्कारविमूढात्मा कर्ताऽहमिति मन्यते"॥इति॥[11]

यत्किमपि व्यापारो वर्तते तत्प्रकृतिनिषु एव। शरीरेन्द्रियन्मन-बुद्धि-चित्त-अहंकार-भूत-मात्रादयश्च प्रकृतेः एव विकृतिः। अतः सर्वेषां कर्मणाम् आत्मनि अध्यासस्य मूलम् अविद्या एव। अविद्या नाम आत्म अनात्मनो अध्यासः। पुनः शङ्कयते। किमर्थं कानिचित् कर्माणि शुभानि कानिचित् कर्माण्यशुभानिs कर्मणां जडत्वेन स्वभावतः तानि न स्वयं शुभाशुभानि। परन्तु पुण्यजनकत्वेन यानि विहितानि तानि शभानि। यानि कर्माणि पापजनकत्वेन प्रोक्तानि तान्यशुभानि। पापजनकत्वं कस्मिन् कर्मणि विद्यते, कस्मिंश्च कर्मणि पुण्यजनकत्वं वर्तते इत्यस्य निर्णयस्तु शास्त्राधीनम् एव । कर्तव्याकर्तव्यस्य विवेकं शास्त्रमेव कारयति।

"तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ"॥[12]

इदमेव भगवद् गीतायाः वचनं प्रमाणम्। शास्त्रे विहितकर्मणाम् अनुष्ठानेन पुण्यप्राप्तिः किञ्च निषिद्धकर्मकरणेन पापजनकत्व च प्रोच्यते। पुण्यपापजनककर्मणां प्रेरकत्वं ग्रहेषु विद्यमानत्वात् ग्रहा अपि शुभाशुभाः भवन्ति। साक्षाद् ग्रहा अपि पुण्यपापकर्मणां प्रेरकाः न सन्ति चेदपि प्रारब्धकर्मवशात् स्थानदृष्टिचेष्टादीनां कारणेन पुण्यपापजनकाः भवन्ति।
अतः प्रारब्धकर्मानुसारेण मनो-बुद्धि-इन्द्रिय-शरीर-वित्त-पुत्र-स्त्री-मित्राणि च ग्रहयोगेन जन्मादितः सर्वाणि प्राप्तानि भवन्ति। यद्वा ग्रहयोगा एव सुखदुःखादिजनककर्मणां सूचकाः वर्तन्ते। सूर्यचन्द्रयोः रश्मिवशात् सञ्जायमानो प्रभावः सर्वेषां कृते समान एव तथैव अन्येषां ग्रहाणां रश्मेः प्रभवोऽपि पृथक् नैव। अतः सूर्यादिग्रहाणां जन्मकुण्डलयां स्थितेर्वशात् विभिन्नानि फलानि यानि कथ्यन्ते तानि प्रारब्धकर्मणां सूचकान्येव । इत्थं ज्योतिश्शास्त्रे प्रारणधकर्मविचार इति विषयमधिकृत्य समासतः निरूपणं कृतमिति शम्।

**परिशीलितग्रन्थाः**


1. सांख्यकारिका
2. योगदर्शनम्
3. छन्दोग्योपनिषद्
4. कठोपनिषद्
5. प्रश्नमार्गः
6. योगसूत्रम्
7. मुण्डकोपनिषद्
8. भगवद्गीता
9. लघुजातकम्


**सन्दर्भ सूची**


1. सा.का.1
2. यो. द. 1.12
3. छा. उ. अ. 5 ख. 10 प्र. 7
4. कठोप. अ.प्र. 2-2-07
5. प्र. मा. अ. 9 श्लो. स. 47
6. यो. सू.1-13
7. मुण्डकोप. द्वि.मु. 28
8. भ.गी. अ. 4 श्लो . सं.37
9. भ. गी. अ 18 श्लो, सं. 14
10. ल.जा. अ.1 श्लो. सं. 3
11. भ.गी. अ. 3 श्लो. सं. 27
12. भ.गी. अ.16. श्लो . सं. 25